# छिन्नमस्ता अष्टोत्तर शतनाम स्तोत्रम्

पार्वत्युवाच

नाम्नां सहस्रमं परमं छिन्नमस्ता-प्रियं शुभम्।

कथितं भवता शम्भो सद्यः शत्रु-निकृन्तनम्।।1।।

पुनः पृच्छाम्यहं देव कृपां कुरु ममोपरि।

सहस्र-नाम-पाठे च अशक्तो यः पुमान् भवेत्।।2।।

तेन किं पठ्यते नाथ तन्मे ब्रूहि कृपामय।

श्री सदाशिव उवाच

अष्टोत्तर-शतं नाम्नां पठ्यते तेन सर्वदा।

सहस्र्-नाम-पाठस्य फलं प्राप्नोति निश्चितम् .

ॐ अस्य श्रीछिन्नमस्ताष्टोत्तर-शत-नाअम-स्तोत्रस्य सदाशिव

ऋषिरनुष्टुप् छन्दः श्रीछिन्नमस्ता देवता

मम-सकल-सिद्धि-प्राप्तये जपे विनियोगः।

ॐ छिन्नमस्ता महाविद्या महाभीमा महोदरी .

चण्डेश्वरी चण्ड-माता चण्ड-मुण्ड्-प्रभञ्जिनी।।4।।

महाचण्डा चण्ड-रूपा चण्डिका चण्ड-खण्डिनी।

क्रोधिनी क्रोध-जननी क्रोध-रूपा कुहू कला ।।5।।

कोपातुरा कोपयुता जोप-संहार-कारिणी ।

वज्र-वैरोचनी वज्रा वज्र-कल्पा च डाकिनी।।6।।

डाकिनी कर्म्म-निरता डाकिनी कर्म-पूजिता।

डाकिनी सङ्ग-निरता डाकिनी प्रेम-पूरिता।।7।।

खट्वाङ्ग-धारिणी खर्वा खड्ग-खप्पर-धारिणी ।

प्रेतासना प्रेत-युता प्रेत-सङ्ग-विहारिणी ।।8।।

छिन्न-मुण्ड-धरा छिन्न-चण्ड-विद्या च चित्रिणी ।

घोर-रूपा घोर-दृष्टर्घोर-रावा घनोवरी ।।9।।

योगिनी योग-निरता जप-यज्ञ-परायणा।

योनि-चक्र-मयी योनिर्योनि-चक्र-प्रवर्तिनी ।।10।।

योनि-मुद्रा-योनि-गम्या योनि-यन्त्र-निवासिनी ।

यन्त्र-रूपा यन्त्र-मयी यन्त्रेशी यन्त्र-पूजिता ।।11।।

कीर्त्या कपर्दिनी: काली कङ्काली कल-कारिणी।

आरक्ता रक्त-नयना रक्त-पान-परायणा ।।12।।

भवानी भूतिदा भूतिर्भूति-दात्री च भैरवी ।

भैरवाचार-निरता भूत-भैरव-सेविता।।13।।

भीमा भीमेश्वरी देवी भीम-नाद-परायणा ।

भवाराध्या भव-नुता भव-सागर-तारिणी ।।14।।

भद्रकाली भद्र तनुर्भद्र-रूपा च भद्रिका।

भद्ररूपा महाभद्रा सुभद्रा भद्रपालिनी।।15।।

सुभव्या भव्य-वदना सुमुखी सिद्ध-सेविता ।

सिद्धिदा सिद्धि-निवहा सिद्धासिद्ध-निषेविता।।16।।

शुभदा शुभगा शुद्धा शुद्ध-सत्वा-शुभावहा ।

श्रेष्ठा दृष्टिमयी देवी दृष्ठि-संहार-कारिणी।।17।।

शर्वाणी सर्वगा सर्वा सर्व-मङ्गल-कारिणी ।

शिवा शान्ता शान्ति-रूपा मृडानी मदनातुरा ।।18।।

इति ते कथितं देवि स्तोत्रं परम-दुर्लभम्।

गुह्याद्-गुह्यतरं गोप्यं गोपनीयं प्रयत्नतः ।।19।।

किमत्र बहुनोक्तेन त्वदग्रं प्राण-वल्लभे।

मारणं मोहनं देवि ह्युच्चाटनमतः परमं .।।20।।

स्तम्भनादिक-कर्म्माणि ऋद्धयः सिद्धयोऽपि च।

त्रिकाल-पठनादस्य सर्वे सिध्यन्त्यसंशयः ।।21।।

महोत्तमं स्तोत्रमिदं वरानने मयेरितं नित्य मनन्य-बुद्धयः।

पठन्ति ये भक्ति-युता नरोत्तमा भवेन्न तेषां रिपुभिः पराजयः ।।22।।

!! इति श्रीछिन्नमस्तका अष्टोत्तरशतनाम स्तोत्रम् !!
पार्वत्युवाच

नाम्नां सहस्रमं परमं छिन्नमस्ता-प्रियं शुभम्।

कथितं भवता शम्भो सद्यः शत्रु-निकृन्तनम्।।1।।

पुनः पृच्छाम्यहं देव कृपां कुरु ममोपरि।

सहस्र-नाम-पाठे च अशक्तो यः पुमान् भवेत्।।2।।

तेन किं पठ्यते नाथ तन्मे ब्रूहि कृपामय।

श्री सदाशिव उवाच

अष्टोत्तर-शतं नाम्नां पठ्यते तेन सर्वदा।

सहस्र्-नाम-पाठस्य फलं प्राप्नोति निश्चितम् .

ॐ अस्य श्रीछिन्नमस्ताष्टोत्तर-शत-नाअम-स्तोत्रस्य सदाशिव

ऋषिरनुष्टुप् छन्दः श्रीछिन्नमस्ता देवता

मम-सकल-सिद्धि-प्राप्तये जपे विनियोगः।

ॐ छिन्नमस्ता महाविद्या महाभीमा महोदरी .

चण्डेश्वरी चण्ड-माता चण्ड-मुण्ड्-प्रभञ्जिनी।।4।।

महाचण्डा चण्ड-रूपा चण्डिका चण्ड-खण्डिनी।

क्रोधिनी क्रोध-जननी क्रोध-रूपा कुहू कला ।।5।।

कोपातुरा कोपयुता जोप-संहार-कारिणी ।

वज्र-वैरोचनी वज्रा वज्र-कल्पा च डाकिनी।।6।।

डाकिनी कर्म्म-निरता डाकिनी कर्म-पूजिता।

डाकिनी सङ्ग-निरता डाकिनी प्रेम-पूरिता।।7।।

खट्वाङ्ग-धारिणी खर्वा खड्ग-खप्पर-धारिणी ।

प्रेतासना प्रेत-युता प्रेत-सङ्ग-विहारिणी ।।8।।

छिन्न-मुण्ड-धरा छिन्न-चण्ड-विद्या च चित्रिणी ।

घोर-रूपा घोर-दृष्टर्घोर-रावा घनोवरी ।।9।।

योगिनी योग-निरता जप-यज्ञ-परायणा।

योनि-चक्र-मयी योनिर्योनि-चक्र-प्रवर्तिनी ।।10।।

योनि-मुद्रा-योनि-गम्या योनि-यन्त्र-निवासिनी ।

यन्त्र-रूपा यन्त्र-मयी यन्त्रेशी यन्त्र-पूजिता ।।11।।

कीर्त्या कपर्दिनी: काली कङ्काली कल-कारिणी।

आरक्ता रक्त-नयना रक्त-पान-परायणा ।।12।।

भवानी भूतिदा भूतिर्भूति-दात्री च भैरवी ।

भैरवाचार-निरता भूत-भैरव-सेविता।।13।।

भीमा भीमेश्वरी देवी भीम-नाद-परायणा ।

भवाराध्या भव-नुता भव-सागर-तारिणी ।।14।।

भद्रकाली भद्र तनुर्भद्र-रूपा च भद्रिका।

भद्ररूपा महाभद्रा सुभद्रा भद्रपालिनी।।15।।

सुभव्या भव्य-वदना सुमुखी सिद्ध-सेविता ।

सिद्धिदा सिद्धि-निवहा सिद्धासिद्ध-निषेविता।।16।।

शुभदा शुभगा शुद्धा शुद्ध-सत्वा-शुभावहा ।

श्रेष्ठा दृष्टिमयी देवी दृष्ठि-संहार-कारिणी।।17।।

शर्वाणी सर्वगा सर्वा सर्व-मङ्गल-कारिणी ।

शिवा शान्ता शान्ति-रूपा मृडानी मदनातुरा ।।18।।

इति ते कथितं देवि स्तोत्रं परम-दुर्लभम्।

गुह्याद्-गुह्यतरं गोप्यं गोपनीयं प्रयत्नतः ।।19।।

किमत्र बहुनोक्तेन त्वदग्रं प्राण-वल्लभे।

मारणं मोहनं देवि ह्युच्चाटनमतः परमं .।।20।।

स्तम्भनादिक-कर्म्माणि ऋद्धयः सिद्धयोऽपि च।

त्रिकाल-पठनादस्य सर्वे सिध्यन्त्यसंशयः ।।21।।

महोत्तमं स्तोत्रमिदं वरानने मयेरितं नित्य मनन्य-बुद्धयः।

पठन्ति ये भक्ति-युता नरोत्तमा भवेन्न तेषां रिपुभिः पराजयः ।।22।।

**!!** इति श्री छिन्नमस्तका अष्टोत्तर शतनाम स्तोत्रम् **!!**